
पञ्चमः पाठः ५

# सर्वनाम-शब्दप्रयोगः

## ( एतत्-तत्-किम् )

### एषः/सः



एषः छात्रः।



सः छात्रः।

### एषा/सा



एषा महिला।




सा महिला।

### एतत्/तत्



एतत् विमानम्।



तत् विमानम्।

| एषः / एषा / एतत् | | सः / सा / तत् |
|---|---|---|
| एषः अध्यापकः | पुँल्लिङ्गे | सः अध्यापकः। |
| एषः मयूरः। | पुँल्लिङ्गे | सः मयूरः। |
| एषा चटका। | स्त्रीलिङ्गे | सा चटका। |
| एषा द्विचक्रिका। | स्त्रीलिङ्गे | सा द्विचक्रिका। |
| एतत् पुष्पम्। | नपुंसकलिङ्गे | तत् पुष्पम् |
| एतत् मन्दिरम् | नपुंसकलिङ्गे | तत् मन्दिरम्। |

## वचन-प्रयोगः

**एषः/एतौ/एते-सः/तौ/ते**




एषः बालकः।



सः बालकः।




एतौ बालकौ।



तौ बालकौ।



एते बालकाः।



ते बालकाः।


| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः गजः। | एतौ गजौ। | एते गजाः। |
| एषः मयूरः। | एतौ मयूरौ। | एते मयूराः। |
| एषः छात्रः। | एतौ छात्रौ। | एते छात्राः। |
| एषः चमसः। | एतौ चमसौ। | एते चमसाः। |

| | | |
|---|---|---|
| सः कपोतः। | तौ कपोतौ। | ते कपोताः। |
| सः सैनिकः। | तौ सैनिकौ। | ते सैनिकाः। |
| सः कुम्भकारः। | तौ कुम्भकारौ । | ते कुम्भकाराः। |
| सः घटः। | तौ घटौ। | ते घटाः। |


## एषा/एते/एताः-सा/ते/ताः



**एषा बालिका।**




**सा बालिका।**



**एते बालिके।**



**ते बालिके।**



**एताः बालिकाः।**




**ताः बालिकाः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषा माला। | एते माले। | एताः मालाः। |
| एषा लता। | एते लते। | एताः लताः। |
| एषा अध्यापिका। | एते अध्यापिके। | एताः अध्यापिकाः। |
| एषा पाठशाला। | एते पाठशाले। | एताः पाठशालाः। |

| | | |
|---|---|---|
| सा वीणा। | ते वीणे । | ताः वीणाः। |
| सा कुञ्चिका | ते कुञ्चिके। | ताः कुञ्चिकाः। |
| सा पिपीलिका। | ते पिपीलिके। | ताः पिपीलिकाः। |
| सा अग्निपेटिका। | ते अग्निपेटिके। | ताः अग्निपेटिकाः। |


## एतत्/एते/ एतानि-तत्/ ते/ तानि




एतत् फलम्।




तत् फलम्।



एते फले।



ते फले।




एतानि फलानि।




तानि फलानि।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
| एतत् पुस्तकम्। | एते पुस्तके। | एतानि पुस्तकानि। |
| एतत् व्यजनम्। | एते व्यजने। | एतानि व्यजनानि। |
| एतत् पर्णम्। | एते पर्णे। | एतानि पर्णानि। |
| एतत् मन्दिरम्। | एते मन्दिरे। | एतानि मन्दिराणि। |
| तत् आसनम्। | ते आसने। | तानि आसनानि। |
| तत् रेलयानम्। | ते रेलयाने। | तानि रेलयानानि। |
| तत् गृहम्। | ते गृहे। | तानि गृहाणि। |
| तत् विमानम्। | ते विमाने। | तानि विमानानि। |

## क्रिया-प्रयोगः



एषः कः ?
एषः छात्रः ।
एषः किं करोति ?
एषः पठति ।




सः कः ?
सः बालकः ।
सः किं करोति ?
सः धावति ।



एतौ कौ ?
एतौ छात्रौ ।
एतौ किं कुरुतः ?
एतौ पठतः ।



तौ कौ ?
तौ बालकौ ।
तौ किं कुरुतः ?
तौ धावतः ।



एते के ?
एते छात्राः ।
एते किं कुर्वन्ति ?
एते पठन्ति ।



ते के ?
ते बालकाः ।
ते किं कुर्वन्ति ?
ते धावन्ति ।



एषा का ?

एषा छात्रा ।

एषा किं करोति ?

एषा लिखति ।




सा का ?

सा बालिका ।

सा किं करोति ?

सा क्रीडति ।



एते के ?

एते छात्रे ।

एते किं कुरुतः ?

एते लिखतः ।




ते के ?

ते बालिके ।

ते किं कुरुतः ?

ते क्रीडतः ।



एताः काः ?

एताः छात्राः ।

एताः किं कुर्वन्ति ?

एताः लिखन्ति ।



ताः काः ?

ताः बालिकाः ।

ताः किं कुर्वन्ति ?


ताः क्रीडन्ति ।



एतत् किम् ?

एतत् पुष्पम् ।

एतत् विकसति ।



तत् किम् ?

तत् फलम् ।

तत् पतति ।



एते के ?

एते पुष्पे ।


एते विकसतः !



ते के ?

ते फले ।


ते पततः ।



एतानि कानि ?

एतानि पुष्पाणि ।

एतानि विकसन्ति ।




तानि कानि ?

तानि फलानि ।


तानि पतन्ति ।

## अभ्यासः


**१. चित्रं दृष्ट्वा उचितैः सर्वनाम-संज्ञापदैः रिक्तस्थानानि पूरयत-**




**एषः** ......................




...................... ......................




...................... ......................



...................... ......................



...................... ......................



...................... ......................

**२. मञ्जूषातः उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत -**

| एषः/एषा/एतत् | | सः/सा/तत् | |
|---|---|---|---|
| **यथा- एषा बालिका ।** | | **सा बालिका ।** | |
| ...................... | कृषकः। | ...................... | कृषकः। |
| ...................... | पुष्पम्। | ...................... | पुष्पम्। |
| ...................... | अश्वः। | ...................... | अश्वः। |
| ...................... | व्यजनम्। | ...................... | व्यजनम्। |
| ...................... | शाटिका। | ...................... | शाटिका। |
| ...................... | वृक्षः । | ...................... | वृक्षः । |
| ...................... | रेलयानम्। | ...................... | रेलयानम्। |
| ...................... | पिपीलिका। | ...................... | पिपीलिका। |
| ...................... | मूषकः । | ...................... | मूषकः। |

१. चित्रं दृष्ट्वा उचित-लिङ्गवचनादिभिः सर्वनामशब्दैः रिक्तस्थानानि पूरयत -




........................ वृक्षः ........................ वृक्षः





.................. .................. ........................ ........................






.................. .................. ........................ ........................



२.




........................ माला ........................ माला





.................. .................. ........................ ........................





.................. .................. ........................ ........................


३.




........................ व्यजनम्




........................ व्यजनम्




............. .............



............. .............



............. .............



............. .............

## ४. कोष्ठकात् उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत –

(क) ....... सिंहौ। (सः / तौ / ते) (ख) ........ मालाः। (एषा / एते / एताः)

(ग) ...... विमानम्। (तत् / ते / तानि) (घ) ........ बालकाः। (एषः / एतौ/एते)

(ङ) ......... लते। (सा / ते / ताः) (च) ........ फले। (एतत् / एते / एतानि)

(छ) ........ अश्वः। (सः / तौ / ते) (ज) ........ मक्षिका। (सा / ते / ताः)

(झ) ....... पुस्तकानि। (एतत् / एते / एतानि) (ञ) ........ बालिकाः। (सा / ते / ताः)

## ५. उचित-वचनप्रयोगैः रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | एषः लिखति । | एतौ लिखतः । | एते लिखन्ति । |
| | (क) .................. । | .................. । | एते क्षालयन्ति। |
| | (ख) एषः पठति । | .................. । | .................. । |
| | (ग) .................. । | तौ गच्छतः। | .................. । |
| | (घ) .................. । | .................. । | ते वदन्ति। |

## ६. कोष्ठकात् उचितं पदं चित्वा प्रश्ननिर्माणं कुरुत -

**यथा** - एषः बालकः । एषः कः ? ( कः / कौ /के )

(क) ते सिंहाः । ते .......................... ? ( कः / कौ /के )

(ख) एषः गणेशः। एषः ........................ ? ( कः / कौ /के )

(ग) ताः छात्राः। ताः .......................... ? ( का / के /काः )

(घ) एषा महिला। एषा ........................ ? ( का / के /काः )

(ङ) एते पुस्तके। एते .................... ...... ?( किम् / के /कानि)

(च) तानि फलानि। तानि ......................... ?( किम् / के /कानि)

## ७. अधोलिखितानि एकवचन-वाक्यानि द्विवचने बहुवचने च लिखत -

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| (क) एषः लिखति। | .................... | .................... |
| (ख ) सः क्षालयति। | .................... | .................... |
| (ग) एषा पठति। | .................... | .................... |
| (घ) सा गच्छति। | .................... | .................... |
| (ङ) तत् पतति। | .................... | .................... |
| (च) एतत् विकसति। | .................... | .................... |

## ८. अत्र मञ्जूषात्रयं प्रदत्तम् अस्ति। प्रत्येकं मञ्जूषात् एकम् एकं पदं चित्वा वाक्यानि रचयत -

| | | |
|---|---|---|
| एषः / सा<br>एतत् / तौ<br>एते / ताः / एतानि | बालकः / अध्यापिका<br>पुष्पम् / कृषकौ<br>गजाः / बालिकाः / पुस्तकानि | लिखति / पाठयति<br>अस्ति / गच्छतः<br>चलन्ति / पठन्ति / सन्ति |

**यथा** - **एषः बालकः लिखति।**

(क) ................................ ........... (ख) .........................................

(ग ) ..................................... ..... (घ ) .........................................

(ङ) ..................................... ...... (च ) .........................................

## योग्यता-विस्तारः

१. द्वितीय-तृतीय-चतुर्थपाठेषु व्यक्ति-वस्तु-स्थानादीनां नामानि ज्ञातवन्तः।

**यथा** – बालकः, छात्रा, घटः, स्थालिका, पुस्तकम्, विद्यालयः, पाकशाला, उद्यानम् इत्यादीनि । एते सर्वे संज्ञाशब्दाः ।

संज्ञाशब्दानां स्थाने येषां शब्दानां प्रयोगः भवति, ते सर्वनामशब्दाः भवन्ति, यथा – सः सा, तत् इत्यादयः ।

**पश्यत** –

बालकः पठति। → सः पठति ।

बालिका लिखति। → सा लिखति ।

२. यथा संज्ञाशब्दानाम् एकवचने, द्विवचने बहुवचने च प्रयोगः भवति, तथा एव सर्वनामशब्दानाम् अपि एकवचने, द्विवचने बहुवचने च प्रयोगः भवति । प्रमुखाणां सर्वनामशब्दानां प्रथमाविभक्तेः रूपाणि अत्र सन्ति –

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| तत् | पुँल्लिङ्गम् | सः | तौ | ते |
| | स्त्रीलिङ्गम् | सा | ते | ताः |
| | नपुंसकलिङ्गम् | तत् | ते | तानि |
| एतत् | पुँल्लिङ्गम् | एषः | एतौ | एते |
| | स्त्रीलिङ्गम् | एषा | एते | एताः |
| | नपुंसकलिङ्गम् | एतत् | एते | एतानि |
| किम् | पुँल्लिङ्गम् | कः | कौ | के |
| | स्त्रीलिङ्गम् | का | के | काः |
| | नपुंसकलिङ्गम् | किम् | के | कानि |

**अध्यापकाय निर्देशः** –

- अध्यापकः एतेषां सर्वनामशब्दानाम् क्रियापदैः सह अभ्यासं कारयेत् ।